नाङ्क :- 05.11.2025

प्रात: - 06:55

## अथ वार्ताः

### उपराष्ट्रपतिः सी. पी. राधाकृष्णन्

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य छत्तीसगढं प्रति एष्यति। , इयं यात्रा पदग्रहणानन्तरं राज्यस्य प्रथमयात्रा अस्ति। यात्रायाः समये सः नव-रायपुर-राजनन्दगाव्-नगरयोः सार्वजनिक-कार्यक्रमाणां श्रृङ्खलायां भागं ग्रहीष्यति, यस्मिन् छत्तीसगढनिर्माणस्य वार्षिकोत्सवस्य प्रतीकरूपेण रजतमहोत्सव: अपि अन्तर्भवति।

### प्रधानमन्त्री- क्यू. एस्. एशिया

प्रधानमन्त्री नरेन्द्रमोदी गतदशके क्यू. एस्. एशिया-विश्वविद्यालयस्य श्रेणिषु भारतीयविश्वविद्यालयानां सङ्ख्यायां वृद्धेः प्रशंसाम् अकरोत्। ह्यः एकस्मिन् जनसंचारपटले श्रीमोदी अब्रवीत् यत्, अनुसंधान-नवान्वेषणयोः केन्द्रीकरणेन यूनां कृते गुणवत्तायुक्तां शिक्षां सुनिश्चेतुं सर्वकारः प्रतिबद्धः अस्ति इति। पञ्च भारतीय-प्रौद्योगिकी-संस्थाः (आई. आई. टी.), भारतीय-विज्ञान-संस्थाः (आई. आई. एस्. सि.), बेङ्गलूरु, दिल्ली-विश्वविद्यालयः च क्यू. एस्. एशिया-विश्वविद्यालय-श्रेणिषु एशियायाः शीर्षशतसंस्थासु स्थानम् अवाप्नोत्।

### बिहार

बिहार-विधानसभा-निर्वाचनस्य प्रथम-चरणाय प्रचाराभियानं ह्य: स्थगितो जातः। अस्मिन् चरणे गुरुवासरे तावत् अष्टादश-जनपदानां एकविंशत्युत्तरशतम् विधानसभा-आसनेषु मतदानं भविष्यति।अन्तिमे दिने एनडीए तथा महागठबंधनस्य घटक-दलानां शीर्ष-नेतृभिः राज्ये मतदातॄणां आकर्षणार्थं सम्पूर्ण-प्रयासः कृतः। अत्रान्तरे, जनता-दलस्य वरिष्ठ-नेतुः तथा केन्द्रीय-मन्त्रिणः राजीव-रञ्जनः उत ललन-सिंहः इत्येतं विरुध्य मोकामा-क्षेत्रे आदर्श-आचार-संहितायाः कथित-उल्लंघनस्य आरोपे एका प्राथमिकी पञ्जीकृता अस्ति। प्राप्त-वृत्तानुसारम् , ललन-सिंहस्य एकं चलचित्र-दृश्यम् सामाजिक-माध्यमेषु प्रसारितं भवति यस्मिन् सः विपक्ष-मतदातॄन् तेषां मताधिकारस्य उपयोगेण निवारयति इति ।

### जम्मू-कश्मीरस्य उपराज्यपालः

जम्मू-कश्मीरस्य उपराज्यपालः मनोज सिन्हा गुरुनानकजयन्त्या: प्रकाशपर्वण: शुभावसरे जनान् अभिनन्दितवान्। आकाशवाण्या: वार्ताहरः प्रतिवेदयति यत् उपराज्यपालः स्वसन्देशे सर्वेभ्यः शुभकामनाः

अयच्छत्। राष्ट्रपतिपदासीना द्रौपदी मुर्मुः ह्यः गुरुनानक-जयन्त्याः पूर्व-सन्ध्यायाम् समेभ्यः देशवासिभ्यः शुभकामनां प्रायच्छत्। स्वकीय-सन्देशे, राष्ट्रपतिः मुर्मुः अवदत् यत् अयं अवसरः सर्वान् गुरुनानकदेवस्य आदर्शानां मूल्यानाञ्च आचराय प्रेरयति सहैव श्रेष्ठ-समाजस्य निर्माणदिशि मार्गदर्शनञ्च करोति। सा अग्रे अवदत् यत् गुरुनानकस्य सन्देशः शिक्षयति यत् सत्य-न्याय-करुणाधारितं जीवनमेव सफलतायाः वास्तविक-मानदण्डम् अस्ति। सः सर्वानपि सत्यनिष्ठया जीवितुं प्रेरयति। राष्ट्रपतिः सर्वान् गुरुनानकदेवस्य आदर्शान् स्वकीये जीवने आत्मसात्-कर्तुम् सहैव शान्तिपूर्णस्य समृद्ध-राष्ट्रस्य च निर्माणाय तस्य मार्गानुसरणस्य आग्रहं अकरोत्।

**<u>भारतीय ऋतुविज्ञान</u>**

भारतीय ऋतुविज्ञानविभागेन (ऐ.एम्.डी.) अद्य तमिळनाडु, पुदुच्चेरी, करैकल् इत्येतेषु प्रदेशेषु केषुचित् स्थानेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं प्रकटितम्। विभागेन उक्तं यत् आन्ध्रप्रदेशस्य, कर्णाटकस्य, तेलङ्गाणा-राज्यस्य, रायलसीमा-प्रदेशस्य च केषुचित् भागेषु आगामिषु कतिपयदिवसेषु लघु-मध्यमवृष्टिः भविष्यति इति।

**<u>राज्यमन्त्री डॉ. जितेंद्र सिंहः</u>**

राज्यमन्त्री डॉ. जितेंद्र सिंहः अद्य नव-दिल्ल्यां चतुर्थराष्ट्रव्यापी-अङ्कीय-जीवन -प्रमाणपत्र-अभियानम् आरप्स्यति। मन्त्रालयेन उक्तं यत् मासपर्यन्तं संचालितं अभियानमिदं देशे पंचशताधिकद्विसहस्रशिविरेषु आयोज्यते। अभियानस्य उद्देश्यं प्रौद्योगिकीम् उपयुज्य निवृत्तिवेतनधारिणां अङ्कीयसशक्तिकरणस्य प्रोत्साहनम् अस्ति।

।। इति वार्ता:।।